CBSE Class 12 Sanskrit Core 2011 - 22 Set 1

Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

Time Allowed: 3 Hours **Maximum Marks: 100**

General Instructions

(i) अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति।

(ii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

(iii) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।

(iv) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(v) खण्ड क — 10 अङ्काः; खण्ड ख — 15 अङ्काः; खण्ड ग — 30 अङ्काः।

(vi) खण्ड घ — पठितांश-अवबोधनम् 35 अङ्काः; सामान्यः संस्कृतसाहित्यपरिचयः 10 अङ्काः।

Section खण्ड क — अपठितांश-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

एकः व्यापारी व्यापारार्थम् उष्ट्रेण गच्छति स्म। यदा स मरुभूमिं प्राप्तः, तदा सः मार्गभ्रष्टः अभवत्। सः इतस्ततः अभ्रमत् परन्तु मार्गं न अलभत। दश दिनानि व्यतीतानि। आहारः समाप्तः जातः। जलमपि समाप्तम्। उष्ट्रस्य अपि दीनदशा अभवत्। व्याकुलः भूत्वा सः दैवं प्रार्थितवान् - 'भगवन्! मह्यम् आहारः दीयताम्, जलं दीयताम्', परन्तु कोऽपि परिणामः न जातः। अन्ते उष्ट्रः अपि विकलः भूत्वा भूमौ पतितः। व्यापारिणः मुखात् प्रार्थना निःसृता - 'भगवन्! एतस्य दीनस्य सत्त्वस्य रक्षां कुरु। अस्य कः दोषः? मत्कृते एषः प्राणान् त्यजति।' तदैव व्यापारिणा दूरे गर्ते जलं दृष्टम्। व्यापारी जलम् आनयति, प्रथमम् उष्ट्राय ददाति, ततः स्वयं पिबति। समीपे खर्जूरफलानि अपि आसन्। तदैव देववाणी अभवत् - 'यः परहितं चिन्तयति तस्य एव देवाः सहायतां कुर्वन्ति।'

प्रश्नाः: (अ) एकपदेन उत्तरत:
(i) यः परहितं चिन्तयति, के तस्य सहायतां कुर्वन्ति?
(ii) मरुभूमौ कस्य दीनदशा अभवत्?
(iii) दूरे गर्ते किं दृष्टम्?
(iv) व्यापारी कुत्र मार्गभ्रष्टः अभवत्?

(ब) पूर्णवाक्येन उत्तरत:
(i) व्याकुलः व्यापारी ईश्वरं प्रति कां प्रार्थनां करोति?
(ii) उष्ट्रस्य मरुभूमौ दीनदशा किमर्थं जाता?

(स) यथानिर्देशम् उत्तरत:
(i) 'अलभत' इति क्रियापदस्य किं कर्तृपदम्?
(ii) 'दीनस्य' इति पदस्य किं विशेष्यम्?
(iii) 'प्रारम्भे' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?
(iv) 'अस्य कः दोषः' इत्यत्र 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

Section खण्ड ख — संस्कृतेन रचनात्मककार्यम्

2. भवान् प्रतीकः। भवता संस्कृतश्लोकपाठ-प्रतियोगितायां प्रथमपुरस्काररूपेण एका सान्द्रमुद्रिका (सी.डी.) प्राप्ता। तत्र संस्कृतेन दश कथाः लिखिताः। तस्याः प्रतिलिपिं कारयित्वा स्वमित्रसमीपं प्रेषयता भवता लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत।

पत्रम् - छात्रावासः, संस्कृतकेन्द्रीयविद्यालयः, _____ (i)

प्रिय मित्र _____ (ii)!

सस्नेहम् अभिवादनम्। भवान् इदं _____ (iii) अतीव प्रसन्नः भविष्यति यद् अन्तर्विद्यालयीय-संस्कृतश्लोकपाठप्रतियोगितायां मया प्रथमः पुरस्कारः _____ (iv)। तत्र पुरस्काररूपेण अहम् _____ (v) सान्द्रमुद्रिकां प्राप्तवान्। _____ (vi) संस्कृतभाषायां दश कथाः सङ्कलिताः। _____ (vii) प्रतिलिपिम् अहम् भवतः समीपे प्रेषयामि। कृपया तां दृष्ट्वा स्वप्रतिक्रियां _____ (viii) प्रेषयतु भवान्। स्वमातापितरौ प्रति मम _____ (ix) निवेद्यताम्।

भवताम् प्रियः सुहृद्, _____ (x)।

मञ्जूषा: एकां, ज्ञात्वा, लिखित्वा, तस्याः, प्रणामाञ्जलिः, प्रतीकः, सौरभ, जयपुरतः, प्राप्तः, यस्याम्।

3. मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत -

एकदा एकः राजा धनपूर्णं _____ (i) सेवकाय दत्त्वा अवदत् - गच्छ, एतद् धनम् साधुषु _____ (ii) आगच्छ। सेवकः सर्वत्र अभ्रमत्, बहून् साधून् मिलित्वा धनं दातुं प्रयत्नम् अकरोत् परन्तु कोऽपि साधुः तस्मिन् रुचिं न _____ (iii)। सेवकं _____ (iv) अन्ये जनाः एकत्रिताः अभवन्। ते सर्वे सेवकं धनं दातुं _____ (v)। सेवकः अवदत् - एतद् धनं साधुषु एव वितरितुम् इच्छति _____ (vi) राजा। यदि केभ्यश्चित् अन्येभ्यः ददामि तर्हि राजा _____ (vii) भविष्यति इति। _____ (viii) सः स्यूतं राज्ञः समीपे आनयत् अवदत् च - 'राजन्! ये साधवः सन्ति ते धनं नेच्छन्ति, ये धनम् इच्छन्ति ते _____ (ix) न सन्ति। इदानीं कः आदेशः?' राजा तेन धनेन साधुभ्यः _____ (x) व्यवस्थाम् अकारयत्।

मञ्जूषा: वितीर्य, परितः, अस्माकम्, आश्रमाणां, स्यूतं, प्रदर्शितवान्, प्रार्थितवन्तः, अन्ततः, क्रुद्धः, साधवः।

4. मञ्जूषायां लिखितपदानां सहायतया पञ्चसंस्कृतवाक्येषु 'परिश्रमस्य महत्त्वम्' इति विषयम् अधिकृत्य वर्णनं कुरुत -

मञ्जूषा: परिश्रमेण, क्षुधा, पूर्णा, भोजनम् मधुरम्, उद्योगिनं, विद्यायां सार्फल्यम्, परिश्रमी जनः, स्वावलम्बी, कठिनसमये, कदापि, दुःखी, जलम् अपि अमृतम्, परिश्रमेण प्राप्तम्, अलसाः, भाग्यस्य आश्रिताः, उपरि।

Section खण्ड ग — अनुप्रयुक्तव्याकरणम्

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत -

(i) एष एव अङ्गीकरोति उत्तरं दक्षिणं चायनम्।
(ii) यद्येवं, तर्हि कौमुदीमहोत्सवप्रतिषेधस्य तावत् प्रयोजनं श्रोतुमिच्छामि।
(iii) सोऽयम् व्यायामकालो न उत्सवकालः।
(iv) अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्।
(v) हितान्न यः संशृणुते स किंप्रभुः।
(vi) लोभश्चेद्गुणेन किम्?

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहाः लेख्याः -

(i) आः अनार्ये! एवं ते आशा छिद्यताम्।
(ii) चारुदत्तस्य गेहे अहोरात्रम् आकण्ठमात्रम् अशित्वा दिवसान् अनयम्।
(iii) एष तत्र भवान् चारुदत्तः गृहदेवतानि अर्चयन् इत एव आगच्छति।
(iv) सखे! दानं श्रेयस्करम्।
(v) एतत् तु मां दहति नष्टधनश्रियो मे यत् सौहृदानि सुजने शिथिलीभवन्ति।
(vi) नानाविधाः चिन्ताङ्कुराः प्रादुर्भवन्ति।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गत-प्रकृति-प्रत्ययान् योजयित्वा रिक्तस्थानानि पूरयत -

(i) अस्माकं मध्ये प्रतिभाशालिनः छात्राः _____। (सम्+उप+स्था+क्त)
(ii) सुश्रुतविरचिता सुश्रुतसंहिता अवश्यमेव _____। (पठ्+अनीयर्)
(iii) नक्षत्रादयः नरस्य कृते पश्चिमं प्रति _____ प्रतीयन्ते। (धाव्+शतृ)
(iv) अहमदनगरे _____ स्तम्भाः स्थिताः। (कम्प्+शानच्)
(v) सुखं हि दुःखानि _____ शोभते। (अनु+भू+क्त्वा > ल्यप्)
(vi) _____ (पिशुन+तल्) यद्यस्ति, किं पातकैः?
(vii) व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न _____। (माया+विनि)
(viii) एषा _____ (भग+मतुप्) बुद्धस्य विशालकाया मूर्तिः।

8. अधोलिखितवाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् -

(i) नेपथ्ये वैतालिकौ काव्यपाठं _____। (कुर्वन्ति/कुरुतः)
(ii) मत्स्यजीविनः अत्र समागत्य मत्स्यसंक्षयं _____। (करिष्यतः/करिष्यन्ति)
(iii) मठानां विशालता भव्यता च प्रेक्षकान् प्रसभम् _____। (आकर्षन्ति/आकर्षतः)
(iv) स्टाक्पैलेस इति संग्रहालये सप्तसप्ततिः कक्षाः _____। (सन्ति/अस्ति)
(v) पर्वतारोहणाय 'लिकिर' 'स्टाक'-नामनी स्थले उपयुक्ते _____। (सन्ति/स्तः)

OR

OR

8. अधोलिखितवाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत -

(i) _____ नृपेषु एव सर्वसम्पदः सदा रतिं कुर्वते।
(ii) कुत्र नु खलु _____ जनं लभेय।
(iii) _____ अशनम् अशितव्यं भविष्यति इति।
(iv) अहम् _____ जनं निमन्त्रयितुम् इच्छामि।
(v) अहम् _____ चारुदत्तस्य आवासमेव गच्छामि।

मञ्जूषाः दरिद्रं, कञ्चित्, सदानुकूलेषु, सम्पन्नम्, तत्रभवतः।

9. अधोलिखितवाक्येषु कोष्ठकप्रदत्तशब्दैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(i) तत् अलं भवतः _____। (सन्ताप)
(ii) _____ प्रति पूर्वाभिमुखी पृथिवी 365.25 वारं प्रतिवर्षं भ्रमति। (सूर्य)
(iii) _____ नमो नमः। (सर्व)
(iv) स स्तम्भः _____ विना तथैव तिष्ठति। (विकृति)
(v) अस्माकं प्राचार्यः _____ पारितोषिकं दास्यति। (छात्र)

Section खण्ड घ — पठितांश-अवबोधनम्

10. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -

(क) गद्यांशः:
प्रियबान्धवाः! यूयं सर्वे दिल्लीस्थलौहस्तम्भेन परिचिताः एव। कोऽपि न अद्य यावत् जानाति कथं सः स्तम्भः विकृतिं विना तथैव तिष्ठति। अन्ये विस्मयकराः स्तम्भाः सन्ति - अहमदनगरे कम्पमानाः स्तम्भाः, सुचिन्दरं-देवालये स्थिताः सङ्गीतमयाः स्तम्भाः, गोलकुण्डादुर्गे प्रतिध्वन्यात्मकाः स्तम्भाः अद्य यावत् दिग्दिगन्तेषु अस्माकं भारतीयवैज्ञानिकानां गौरवगाथां वर्णयन्ति।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) लौहस्तम्भः कां विना तथैव तिष्ठति? (ii) कम्पमानाः स्तम्भाः कस्मिन् नगरे स्थिताः?

(ब) पूर्णवाक्येन उत्तरत - सुचिन्दरं देवालयस्य स्तम्भाः कीदृशाः सन्ति?

(स) यथानिर्देशम् उत्तरत - (i) 'विस्मयकराः' इति विशेषणस्य विशेष्यं किम्? (ii) अस्मिन् अनुच्छेदे सम्बोधनपदं किम्? (द) (i) 'जानाति' इति क्रियापदस्य कर्तृपदं किम्? (ii) 'यशोगानम्' इति पदस्य समानार्थकं पदं किम्?

(ख) पद्यांशः:
लोभश्चेदगुणेन किं, पिशुनता यद्यस्ति किं पातकैः, सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।
सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः, सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) सर्वेभ्यः श्रेष्ठं धनं किम्? (ii) किं नु खलु मृत्योः अपि दुःखदायि वर्तते?

(ब) पूर्णवाक्येन उत्तरत - किं नाम तपसः अपि अधिकं श्रेयस्करम्?

10. (continued)

(स) यथानिर्देशम् उत्तरत - (i) 'शुचि' इति विशेषणस्य विशेष्यं किम्? (ii) 'यशः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्? (iii) (i) 'सज्जनता' इति कृते किं पदम् अत्र प्रयुक्तम्? (ii) 'दोषेण' इत्यस्य किं समानार्थकं पदमत्र प्रयुक्तम्?

(ग) नाट्यांशः:
नटी - (प्रविश्य) आर्य! इयमस्मि। आर्य! दिष्ट्या खलु आगतोऽसि।
सूत्रधारः - आर्ये! किम् अस्त्यस्माकं गेहे कोऽपि प्रातराशः?
नटी - अस्ति, घृतं, गुडं, दधि, तण्डुलाश्च सर्वम् अस्ति।
सूत्रधारः - चिरं जीव, एवं शोभनानां भोजनानां दात्री भव। आर्ये! किमेतत् सर्वम् अस्माकं गेहेऽस्ति?
नटी - नहि, नहि अन्तरापणे।
सूत्रधारः - (सरोषम्) आः अनार्ये! एवं ते आशा छिद्यताम्। अहं पर्वतात् दूरम् आरोप्य पातितोऽस्मि।
नटी - मा बिभीहि, मा बिभीहि। मुहूर्तकं प्रतिपालयतु आर्यः। सर्वं सज्जं भविष्यति। आर्य! अद्य ममोपवासः अस्ति। कञ्चिद् जनं निमन्त्रयितुम् इच्छामि।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) सर्वे भोज्यपदार्थाः कुत्र आसन्? (ii) वस्तुतः सूत्रधारः कुतः आरोप्य पातितः?

(ब) पूर्णवाक्येन उत्तरत - नटी किमर्थं कमपि जनं निमन्त्रयितुम् इच्छति?

(स) यथानिर्देशम् उत्तरत - (i) 'अस्मि' इति क्रियापदस्य कर्तृपदं किम्? (ii) 'शोभनानाम्' इति पदस्य विशेष्यं किम्? (iii) (i) 'आर्ये' इति पदस्य विलोमपदं किमत्र प्रयुक्तम्? (ii) 'एवं ते आशा छिद्यताम्' इति वाक्ये 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम्?

11. यथानिर्देशं प्रश्नान् उत्तरत -

(i) 'राष्ट्रचिन्ता गरीयसी' इति पाठः कस्मात् ग्रन्थात् संगृहीतः?

(ii) 'किन्तु न कदाचित् आर्यस्य निष्प्रयोजना प्रवृत्तिः।' इति कः कं कथयति?

12. प्रत्येकम् अंशस्य प्रदत्तभावार्थत्रयात् शुद्धभावार्थं चित्वा लिखत -

(अ) 'उत्तिष्ठत, जाग्रत, प्राप्य वरान् निबोधत।'
भावार्थाः: (i) यूयं सबलाः भवत, अज्ञानस्य निद्रां त्यजत, वरान् प्राप्तुं प्रयत्नं कुरुत। (ii) यूयं ज्ञानाय प्रयत्नं कुरुत, निद्रां त्यजत, महापुरुषाणां समीपं गत्वा रहस्यं जानीत। (iii) हे जनाः! यूयं ज्ञानं प्राप्तुं तत्पराः भवत। अज्ञाननिद्रां त्यक्त्वा उत्तिष्ठत महापुरुषाणां समीपे गत्वा ज्ञानं प्राप्तुं प्रयत्नं कुरुत।

(ब) 'सत्येन पन्था विततो देवयानः।'
भावार्थाः: (i) देवतानां यानानि सत्यस्य मार्गे गच्छन्ति। (ii) महापुरुषाणां मार्गः सत्येन एव परिपूर्णः। (iii) देवतानां मार्गः एव तपसः मार्गः।

OR

OR

12. अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत -

येनाक्रमन्त्यृषयो ह्याप्तकामाः, यत्र तत् सत्यस्य परमं निधानम्।

भावार्थः: सफलमनोरथाः (i) _____ यं मार्गं स्वीकुर्वन्ति, यस्य (ii) _____ अनुसरणं कुर्वन्ति, सः मार्गः सत्यस्य परमं (iii) _____ तदेव, अर्थात् सः मार्गः (iv) _____ मार्गः एव।

मञ्जूषाः पथः, धाम, ऋषयः, सत्यस्य।

13. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत -

(अ) पद्यांशः: अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः, कृतप्रयत्नोऽपि गृहे न जीवति।।
अन्वयः: अरक्षितम् (i) _____ तिष्ठति। सुरक्षितम् (ii) _____ विनश्यति। अनाथः (iii) _____ विसर्जितः अपि जीवति। कृतप्रयत्नः (iv) _____ अपि न जीवति।

(ब) पद्यांशः: अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम्। एको हि दोषो गुणसन्निपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः।।
अन्वयः: यस्य अनन्तरत्नप्रभवस्य (i) _____ सौभाग्यविलोपि न जातम्, (ii) _____ किरणेषु अङ्कः इव एकः हि (iii) _____ गुणसन्निपाते (iv) _____।

14. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुनः लिखत -

कः (i) एष एव अङ्गीकरोति (ii) एनम् एव आश्रित्य भवति (iii) एष भगवान् मणिः (iv) अयमेव वत्सरम्

खः (अ) परमेष्ठिनः पराद्धसंख्या। (ब) द्वादशसु भागेषु विभनक्ति। (स) उत्तरं दक्षिणं चायनम्। (द) आकाशमण्डलस्य।

15. अधोलिखितवाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत -

(अ) 'तत्कथं कौमुदीमहोत्सवः न <u>प्रारब्धः</u>?' (i) भाग्यम् (ii) समाप्तः (iii) उद्घाटितः।

(ब) 'तथा हि गोमयानाम् <u>उपलभेदकम्</u> एतत् प्रस्तरखण्डम्।' (i) कोमलयन्त्रम् (ii) गोः पुरीषम्, तेन निर्मितखण्डस्य त्रोटकम् (iii) गोः पुरीषस्य समूहस्य विनाशकम्।

(स) 'प्रासादस्य उपरि स्थिताः प्रदेशाः <u>संस्क्रियन्ताम्</u>।' (i) अलङ्क्रियन्ताम् (ii) संशोध्यन्ताम् (iii) निर्मीयन्ताम्।

(द) 'न खलु आर्यचाणक्येन अपहृतः प्रेक्षकाणां चक्षुषोः विषयः?' (i) आलोचकानाम् (ii) दर्शकानाम् (iii) अभिनेतृणाम्।

16. अधोलिखितानां कवीनां देश-काल-कृतीनां यथानिर्देशं नामानि लिखत -

(अ) (i) अश्वघोषः (ii) जयदेवः (iii) माघः [देशः]

(ब) (i) भर्तृहरिः (ii) व्यासः (iii) बाणः [कालः]

(स) (i) भवभूतिः (ii) भारविः (iii) चरकः (iv) वाल्मीकिः [एका रचना]

अथवा (OR)

OR

16. (अ) निम्नलिखितवाक्येषु मञ्जूषायाः पदानि चित्वा रिक्तस्थानपूर्तिः क्रियताम् -

(i) पद्यसाहित्यस्य भेदद्वयम् अस्ति महाकाव्यम् _____ च।
(ii) _____ आख्यायिका च गद्यकाव्यस्य प्रमुखं भेदद्वयम्।
(iii) पञ्चसन्धिसमन्वितं _____ भवति।
(iv) प्रकरणं _____ एकः भेदः अस्ति।
(v) महाभारते _____ पर्वाणि सन्ति।
(vi) गद्यपद्यमयी रचना _____ इति कथ्यते।
(vii) सर्वप्रथमः त्वक्-प्रत्यारोपकः _____ अस्ति।
(viii) ईशोपनिषद् _____ चत्वारिंशत्तमः अध्यायः अस्ति।
(ix) मुद्राराक्षसे _____ अभावः वर्तते।
(x) बुद्धचरितस्य रचयिता _____ अस्ति।

मञ्जूषा: चम्पूः, अष्टादश, कथा, खण्डकाव्यम्, रूपकस्य, अश्वघोषः, सुश्रुतः, नाटकम्, यजुर्वेदस्य, विदूषकस्य।

(ब) गद्यकाव्यस्य काः अपि पञ्च विशेषताः संस्कृतेन लिखत।
Write any five characteristics of Sanskrit prose literature.

- End of Question Paper -